# ॥ वक्रतुण्डमहागणपतिसहस्रनामस्तोत्रम् ॥

## मुनिरुवाच

कथं नाम्नां सहस्रं तं गणेश उपदिष्टवान्।
शिवदं तन्ममाचक्ष्व लोकानुग्रहतत्पर॥ १ ॥

## ब्रह्मोवाच

देवः पूर्वं पुरारातिः पुरत्रयजयोद्यमे।
अनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल॥ २ ॥

मनसा स विनिर्धार्य ददृशे विघ्नकारणम्।
महागणपतिं भक्त्या समभ्यर्च्य यथाविधि॥ ३ ॥

विघ्नप्रशमनोपायमपृच्छदपरिश्रमम् ।
सन्तुष्टः पूजया शम्भोर्महागणपतिः स्वयम्॥ ४ ॥

सर्वविघ्नप्रशमनं सर्वकामफलप्रदम्।
ततस्तस्मै स्वयं नाम्नां सहस्रमिदमब्रवीत्॥ ५ ॥

अस्य श्रीवक्रतुण्डमहागणपतिसहस्रनामस्तोत्रमन्त्रस्य
महागणपतिर्ऋषिः। अनुष्टुप् छन्दः। महागणपतिर्देवता।
गं बीजम्। हुं शक्तिः। स्वाहा कीलकम्।
चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः।

## ॥ करन्यासः ॥

गणेश्वरो गणक्रीड इत्यङ्गुष्ठाभ्यां नमः।
कुमारगुरुरीशान इति तर्जनीभ्यां नमः।
ब्रह्माण्डकुम्भश्चिद्व्योमेति मध्यमाभ्यां नमः।

रक्तो रक्ताम्बरधर इत्यनामिकाभ्यां नमः।
सर्वसद्गुरुसंसेव्य इति कनिष्ठिकाभ्यां नमः।
लुप्तविघ्नः स्वभक्तानामिति करतलकरपृष्ठाभ्यां नमः।

## ॥ हृदयादिन्यासः ॥

छन्दश्छन्दोद्भव इति हृदयाय नमः।
निष्कलो निर्मल इति शिरसे स्वाहा।
सृष्टिस्थितिलयक्रीड इति शिखायै वषट्।
ज्ञानं विज्ञानमानन्द इति कवचाय हुम्।
अष्टाङ्गयोगफलभृदिति नेत्रत्रयाय वौषट्।
अनन्तशक्तिसहित इत्यस्त्राय फट्।
भूर्भुवः स्वरोम् इति दिग्बन्धः।

## ॥ ध्यानम् ॥

गजवदनमचिन्त्यं तीक्ष्णदंष्ट्रं त्रिनेत्रं
बृहदुदरमशेषं भूतिराजं पुराणम्।
अमरवरसुपूज्यं रक्तवर्णं सुरेशं
पशुपतिसुतमीशं विघ्नराजं नमामि॥

खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम्।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम्॥

सकलविघ्नविनाशनद्वारा श्रीमहागणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः।

## ॥ स्तोत्रम् ॥

### श्रीगणपतिरुवाच

ॐ गणेश्वरो गणक्रीडो गणनाथो गणाधिपः।
एकदन्तो वक्रतुण्डो गजवक्त्रो महोदरः॥ १॥

लम्बोदरो धूम्रवर्णो विकटो विघ्ननाशनः।
सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः॥ २॥

भीमः प्रमोद आमोदः सुरानन्दो मदोत्कटः।
हेरम्बः शम्बरः शम्भुर्लम्बकर्णो महाबलः॥ ३॥

नन्दनो लम्पटो भीमो मेघनादो गणञ्जयः।
विनायको विरूपाक्षो वीरः शूरवरप्रदः॥ ४॥

महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः।
रुद्रप्रियो गणाध्यक्ष उमापुत्रोऽघनाशनः॥ ५॥

कुमारगुरुरीशानपुत्रो मूषकवाहनः।
सिद्धिप्रियः सिद्धिपतिः सिद्धः सिद्धिविनायकः॥ ६॥

अविघ्नस्तुम्बुरुः सिंहवाहनो मोहिनीप्रियः।
कटङ्कटो राजपुत्रः शाकलः सम्मितोऽमितः॥ ७॥

कूष्माण्डसामसम्भूतिर्दुर्जयो धूर्जयो जयः।
भूपतिर्भुवनपतिर्भूतानां पतिरव्ययः॥ ८॥

विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्गुणः।
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मवित्प्रियः॥ ९॥

ज्येष्ठराजो निधिपतिर्निधिप्रियपतिप्रियः।
हिरण्मयपुरान्तःस्थः सूर्यमण्डलमध्यगः॥ १०॥

कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभित्।
उमाङ्ककेलिकुतुकी मुक्तिदः कुलपावनः॥ ११॥

किरीटी कुण्डली हारी वनमाली मनोमयः।
वैमुख्यहतदैत्यश्रीः पादाहतिजितक्षितिः॥ १२॥

सद्योजातः स्वर्णमुञ्जमेखली दुर्निमित्तहृत्।
दुःस्वप्नहृत्प्रसहनो गुणी नादप्रतिष्ठितः॥ १३॥

सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः।
पीताम्बरः खण्डरदः खण्डवैशाखसंस्थितः॥ १४॥

चित्राङ्गः श्यामदशनो भालचन्द्रो हविर्भुजः।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः॥ १५॥

गणाधिराजो विजयः स्थिरो गजपतिर्ध्वजी।
देवदेवः स्मरः प्राणदीपको वायुकीलकः॥ १६॥

विपश्चिद्वरदो नादो नादभिन्नमहाचलः।
वराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः॥ १७॥

इच्छाशक्तिभवो देवत्राता दैत्यविमर्दनः।
शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुहास्यभूः॥ १८॥

शम्भुतेजाः शिवाशोकहारी गौरीसुखावहः।
उमाङ्गमलजो गौरीतेजोभूः स्वर्धुनीभवः॥ १९॥

यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः।
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः॥ २०॥

ब्रह्माण्डकुम्भश्चिद्व्योमभालःसत्यशिरोरुहः।
जगज्जन्मलयोन्मेषनिमेषोऽग्न्यर्कसोमदृक् ॥ २१॥

गिरीन्द्रैकरदो धर्माधर्मोष्ठः सामबृंहितः।
ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः॥ २२॥

भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोदकः।
कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः॥ २३॥

नदीनदभुजः सर्पाङ्गुलीकस्तारकानखः।
व्योमनाभिः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः॥ २४॥

कुक्षिस्थयक्षगन्धर्वरक्षःकिन्नरमानुषः ।
पृथ्वीकटिः सृष्टिलिङ्गः शैलोरुर्दस्रजानुकः॥ २५॥

पातालजङ्घो मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः।
ज्योतिर्मण्डललाङ्गूलो हृदयालाननिश्चलः॥ २६॥

हृत्पद्मकर्णिकाशाली वियत्केलिसरोवरः।
सद्भक्तध्याननिगडः पूजावारिनिवारितः॥ २७॥

प्रतापी काश्यपो मन्ता गणको विष्टपी बली।
यशस्वी धार्मिको जेता प्रथमः प्रमथेश्वरः॥ २८॥

चिन्तामणिर्द्वीपपतिः कल्पद्रुमवनालयः।
रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः॥ २९॥

तीव्राशिरोद्धृतपदो ज्वालिनीमौलिलालितः।
नन्दानन्दितपीठश्रीर्भोगदो भूषितासनः॥ ३०॥

सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः।
तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः॥ ३१॥

सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजालयः।
लिपिपद्मासनाधारो वह्निधामत्रयालयः॥ ३२॥

उन्नतप्रपदो गूढगुल्फः संवृतपार्ष्णिकः।
पीनजङ्घः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः॥ ३३॥

निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः।
पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः॥ ३४॥

भग्नवामरदस्तुङ्गसव्यदन्तो महाहनुः।
ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः॥ ३५॥

स्तबकाकारकुम्भाग्रो रत्नमौलिर्निरङ्कुशः।
सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान्॥ ३६॥

सर्पकोटीरकटकः सर्पग्रैवेयकाङ्गदः।
सर्पकक्षोदराबन्धः सर्पराजोत्तरच्छदः॥ ३७॥

रक्तो रक्ताम्बरधरो रक्तमालाविभूषणः।
रक्तेक्षणो रक्तकरो रक्तताल्वोष्ठपल्लवः॥ ३८॥

श्वेतः श्वेताम्बरधरः श्वेतमालाविभूषणः।
श्वेतातपत्ररुचिरः श्वेतचामरवीजितः॥ ३९॥

सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः।
सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः॥ ४०॥

सर्वमङ्गलमाङ्गल्यः सर्वकारणकारणम्।
सर्वदेववरः शार्ङ्गी बीजपूरी गदाधरः॥ ४१॥

इक्षुचापधरः शूली चक्रपाणिः सरोजभृत्।
पाशी धृतोत्पलः शालिमञ्जरीभृत्स्वदन्तभृत्॥ ४२॥

कल्पवल्लीधरो विश्वाभयदैककरो वशी।
अक्षमालाधरो ज्ञानमुद्रावान् मुद्गरायुधः॥ ४३॥

पूर्णपात्री कम्बुधरो विधृताङ्कुशमूलकः।
करस्थाम्रफलश्चूतकलिकाभृत्कुठारवान्॥४४॥

पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः ।
भारतीसुन्दरीनाथो विनायकरतिप्रियः॥४५॥

महालक्ष्मीप्रियतमः सिद्धलक्ष्मीमनोरमः।
रमारमेशपूर्वाङ्गो दक्षिणोमामहेश्वरः॥४६॥

महीवराहवामाङ्गो रतिकन्दर्पपश्चिमः।
आमोदमोदजननः सम्प्रमोदप्रमोदनः॥४७॥

संवर्धितमहावृद्धिर्ऋद्धिसिद्धिप्रवर्धनः ।
दन्तसौमुख्यसुमुखः कान्तिकन्दलिताश्रयः॥४८॥

मदनावत्याश्रिताङ्घ्रिः कृतवैमुख्यदुर्मुखः।
विघ्नसम्पल्लवः पद्मः सर्वोन्नतमदद्रवः॥४९॥

विघ्नकृन्निम्नचरणो द्राविणीशक्तिसत्कृतः।
तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक्॥५०॥

मोहिनीमोहनो भोगदायिनीकान्तिमण्डनः।
कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः ॥५१॥

वसुधारामदोन्नादो महाशङ्खनिधिप्रियः।
नमद्वसुमतीमाली महापद्मनिधिः प्रभुः॥५२॥

सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः।
ईशानमूर्धा देवेन्द्रशिखः पवननन्दनः॥५३॥

प्रत्युग्रनयनो दिव्यो दिव्यास्त्रशतपर्वधृक्।
ऐरावतादिसर्वाशावारणो वारणप्रियः॥५४॥

वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः।
जयाजयपरिकरो विजयाविजयावहः॥५५॥

अजयार्चितपादाब्जो नित्यानन्दवनस्थितः।
विलासिनीकृतोल्लासः शौण्डी सौन्दर्यमण्डितः॥५६॥

अनन्तानन्तसुखदः सुमङ्गलसुमङ्गलः।
ज्ञानाश्रयः क्रियाधार इच्छाशक्तिनिषेवितः॥५७॥

सुभगासंश्रितपदो ललिताललिताश्रयः।
कामिनीपालनः कामकामिनीकेलिलालितः॥५८॥

सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः।
गुरुगुप्तपदो वाचासिद्धो वागीश्वरीपतिः॥५९॥

नलिनीकामुको वामारामो ज्येष्ठामनोरमः।
रौद्रीमुद्रितपादाब्जो हुम्बीजस्तुङ्गशक्तिकः॥६०॥

विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः।
अमृताब्धिकृतावासो मदघूर्णितलोचनः॥६१॥

उच्छिष्टोच्छिष्टगणको गणेशो गणनायकः।
सार्वकालिकसंसिद्धिर्नित्यसेव्यो दिगम्बरः॥६२॥

अनपायोऽनन्तदृष्टिरप्रमेयोऽजरामरः।
अनाविलोऽप्रतिहतिरच्युतोऽमृतमक्षरः॥६३॥

अप्रतर्क्योऽक्षयोऽजय्योऽनाधारोऽनामयोऽमलः।
अमेयसिद्धिरद्वैतमघोरोऽग्निसमाननः॥६४॥

अनाकारोऽब्धिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः।
आधारपीठमाधार आधाराधेयवर्जितः॥६५॥

आखुकेतन आशापूरक आखुमहारथः।
इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः॥ ६६॥

इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः ।
इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः॥ ६७॥

इन्दीवरदलश्याम इन्दुमण्डलमण्डितः।
इध्मप्रिय इडाभाग इडावानिन्दिराप्रियः॥ ६८॥

इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः।
ईशानमौलिरीशान ईशानप्रिय ईतिहा॥ ६९॥

ईषणात्रयकल्पान्त ईहामात्रविवर्जितः।
उपेन्द्र उडुभृन्मौलिरुडुनाथकरप्रियः॥ ७०॥

उन्नतानन उत्तुङ्ग उदारस्त्रिदशाग्रणीः।
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः॥ ७१॥

ऋग्यजुःसामनयन ऋद्धिसिद्धिसमर्पकः।
ऋजुचित्तैकसुलभो ऋणत्रयविमोचनः॥ ७२॥

लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषाम्।
लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः॥ ७३॥

एकारपीठमध्यस्थ एकपादकृतासनः।
एजिताखिलदैत्यश्रीरेधिताखिलसंश्रयः॥ ७४॥

ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः।
ऐरम्मदसमोन्मेष ऐरावतसमाननः॥ ७५॥

ओङ्कारवाच्य ओङ्कार ओजस्वानोषधीपतिः।
औदार्यनिधिरौद्धत्यधैर्य औन्नत्यनिःसमः॥ ७६॥

अङ्कुशः सुरनागानामङ्कुशाकारसंस्थितः।
अः समस्तविसर्गान्तपदेषु परिकीर्तितः॥ ७७॥

कमण्डलुधरः कल्पः कपर्दी कलभाननः।
कर्मसाक्षी कर्मकर्ता कर्माकर्मफलप्रदः॥ ७८॥

कदम्बगोलकाकारः कूष्माण्डगणनायकः।
कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत्॥ ७९॥

खर्वः खड्गप्रियः खड्गः खान्तान्तःस्थः खनिर्मलः।
खल्वाटश‍ृङ्गनिलयः खट्वाङ्गी खन्दुरासदः॥ ८०॥

गुणाढ्यो गहनो गद्यो गद्यपद्यसुधार्णवः।
गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्वजः॥ ८१॥

गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः।
गुहाशयो गुडाब्धिस्थो गुरुगम्यो गुरुर्गुरुः॥ ८२॥

घण्टाघर्घरिकामाली घटकुम्भो घटोदरः।
ङकारवाच्यो ङाकारो ङकाराकारशुण्डभृत्॥ ८३॥

चण्डश्चण्डेश्वरश्चण्डी चण्डेशश्चण्डविक्रमः।
चराचरपिता चिन्तामणिश्चर्वणलालसः॥ ८४॥

छन्दश्छन्दोद्भवश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः।
जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः॥ ८५॥

जप्यो जपपरो जाप्यो जिह्वासिंहासनप्रभुः।
स्रवद्गण्डोल्लसद्धानझङ्कारिभ्रमराकुलः॥ ८६॥

टङ्कारस्फारसंरावष्टङ्कारमणिनूपुरः।
ठद्वयीपल्लवान्तस्थसर्वमन्त्रेषु सिद्धिदः॥ ८७॥

डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः।
ढक्कानिनादमुदितो ढौङ्को ढुण्ढिविनायकः॥८८॥

तत्त्वानां प्रकृतिस्तत्त्वं तत्त्वम्पदनिरूपितः।
तारकान्तरसंस्थानस्तारकस्तारकान्तकः ॥८९॥

स्थाणुः स्थाणुप्रियः स्थाता स्थावरं जङ्गमं जगत्।
दक्षयज्ञप्रमथनो दाता दानं दमो दया॥९०॥

दयावान्दिव्यविभवो दण्डभृद् दण्डनायकः।
दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः॥९१॥

दंष्ट्रालग्नद्वीपघटो देवार्थनृगजाकृतिः।
धनं धनपतेर्बन्धुर्धनदो धरणीधरः॥९२॥

ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः।
ध्वनिप्रकृतिचीत्कारो ब्रह्माण्डावलिमेखलः॥९३॥

नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः।
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः॥९४॥

परं व्योम परं धाम परमात्मा परं पदम्।
परात्परः पशुपतिः पशुपाशविमोचनः।
पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः॥९५॥

पद्मप्रसन्नवदनः प्रणताज्ञाननाशनः।
प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः॥९६॥

फणिहस्तः फणिपतिः फूत्कारः फणितप्रियः।
बाणार्चिताङ्घ्रियुगलो बालकेलिकुतूहली।
ब्रह्म ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः॥९७॥

बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः।
बृहन्नादाग्र्यचीत्कारो ब्रह्माण्डावलिमेखलः॥९८॥

भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः।
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः॥९९॥

भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः।
मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तो मनोरमः॥१००॥

मेखलाहीश्वरो मन्दगतिर्मन्दनिभेक्षणः।
महाबलो महावीर्यो महाप्राणो महामनाः॥१०१॥

यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः।
यशस्करो योगगम्यो याज्ञिको याजकप्रियः॥१०२॥

रसो रसप्रियो रस्यो रञ्जको रावणार्चितः।
राज्यरक्षाकरो रत्नगर्भो राज्यसुखप्रदः॥१०३॥

लक्षो लक्षपतिर्लक्ष्यो लयस्थो लड्डुकप्रियः।
लासप्रियो लास्यपरो लाभकृल्लोकविश्रुतः॥१०४॥

वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः।
विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः॥१०५॥

वामदेवो विश्वनेता वज्रिवज्रनिवारणः।
विवस्वद् बन्धनो विश्वाधारो विश्वेश्वरो विभुः॥१०६॥

शब्दब्रह्म शमप्राप्यः शम्भुशक्तिगणेश्वरः।
शास्ता शिखाग्रनिलयः शरण्यः शम्बरेश्वरः॥१०७॥

षड्तुकुसुमस्रग्वी षडाधारः षडक्षरः।
संसारवैद्यः सर्वज्ञः सर्वभेषजभेषजम्॥१०८॥

सृष्टिस्थितिलयक्रीडः सुरकुञ्जरभेदकः।
सिन्दूरितमहाकुम्भः सदसद्भक्तिदायकः॥ १०९॥

साक्षी समुद्रमथनः स्वयंवेद्यः स्वदक्षिणः।
स्वतन्त्रः सत्यसङ्कल्पः सामगानरतः सुखी॥ ११०॥

हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक्।
हव्यं हुतप्रियो हृष्टो हृल्लेखामन्त्रमध्यगः॥ १११॥

क्षेत्राधिपः क्षमाभर्ता क्षमाक्षमपरायणः।
क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः॥ ११२॥

धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः।
विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः॥ ११३॥

आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः।
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः॥ ११४॥

मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः।
प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः॥ ११५॥

पराभिचारशमनो दुःखहा बन्धमोक्षदः।
लवस्त्रुटिः कला काष्ठा निमेषस्तत्परक्षणः॥ ११६॥

घटी मुहूर्तः प्रहरो दिवा नक्तमहर्निशम्।
पक्षो मासर्त्वयनाब्दयुगं कल्पो महालयः॥ ११७॥

राशिस्तारा तिथिर्योगो वारः करणमंशकम्।
लग्नं होरा कालचक्रं मेरुः सप्तर्षयो ध्रुवः॥ ११८॥

राहुर्मन्दः कविर्जीवो बुधो भौमः शशी रविः।
कालः सृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमं जगत्॥ ११९॥

भूरापोऽग्निर्मरुद्व्योमाहङ्कृतिः प्रकृतिः पुमान्।
ब्रह्मा विष्णुः शिवो रुद्र ईशः शक्तिः सदाशिवः॥ १२०॥

त्रिदशाः पितरः सिद्धा यक्षा रक्षांसि किन्नराः।
सिद्धविद्याधरा भूता मनुष्याः पशवः खगाः॥ १२१॥

समुद्राः सरितः शैला भूतं भव्यं भवोद्भवः।
साङ्ख्यं पातञ्जलं योगं पुराणानि श्रुतिः स्मृतिः॥ १२२॥

वेदाङ्गानि सदाचारो मीमांसा न्यायविस्तरः।
आयुर्वेदो धनुर्वेदो गान्धर्वं काव्यनाटकम्॥ १२३॥

वैखानसं भागवतं मानुषं पाञ्चरात्रकम्।
शैवं पाशुपतं कालामुखं भैरवशासनम्॥ १२४॥

शाक्तं वैनायकं सौरं जैनमार्हतसंहिता।
सदसद्व्यक्तमव्यक्तं सचेतनमचेतनम्॥ १२५॥

बन्धो मोक्षः सुखं भोगो योगः सत्यमणुर्महान्।
स्वस्ति हुम्फट् स्वधा स्वाहा श्रौषट् वौषट् वषण्णमः॥ १२६॥

ज्ञानं विज्ञानमानन्दो बोधः संवित्समोऽसमः।
एक एकाक्षराधार एकाक्षरपरायणः॥ १२७॥

एकाग्रधीरेकवीर एकोऽनेकस्वरूपधृक्।
द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्वीपरक्षकः॥ १२८॥

द्वैमातुरो द्विवदनो द्वन्द्वहीनो द्वयातिगः।
त्रिधामा त्रिकरस्त्रेता त्रिवर्गफलदायकः॥ १२९॥

त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः।
चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः ॥ १३०॥

चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्भुजः।
चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः ॥ १३१ ॥

चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः ।
पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्तमः ॥ १३२ ॥

पञ्चाधारः पञ्चवर्णः पञ्चाक्षरपरायणः।
पञ्चतालः पञ्चकरः पञ्चप्रणवमातृकः ॥ १३३ ॥

पञ्चब्रह्ममयस्फूर्तिः पञ्चावरणवारितः।
पञ्चभक्षप्रियः पञ्चबाणः पञ्चशिवात्मकः ॥ १३४ ॥

षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः।
षडङ्गध्वान्तविध्वंसी षडङ्गुलमहाह्रदः ॥ १३५ ॥

षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः।
षड्वैरिवर्गविध्वंसी षडूर्मिभयभञ्जनः ॥ १३६ ॥

षट्तर्कदूरः षट्कर्मा षड्गुणः षड्रसाश्रयः।
सप्तपातालचरणः सप्तद्वीपोरुमण्डलः ॥ १३७ ॥

सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः।
सप्ताङ्गराज्यसुखदः सप्तर्षिगणवन्दितः ॥ १३८ ॥

सप्तच्छन्दोनिधिः सप्तहोत्रः सप्तस्वराश्रयः।
सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः ॥ १३९ ॥

सप्तच्छन्दो मोदमदः सप्तच्छन्दो मखप्रभुः।
अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणम् ॥ १४० ॥

अष्टाङ्गयोगफलभृदष्टपत्राम्बुजासनः।
अष्टशक्तिसमानश्रीरष्टैश्वर्यप्रवर्धनः ॥ १४१ ॥

अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ।
अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्तिभृत्॥ १४२॥

अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः ।
अष्टश्रीरष्टसामश्रीरष्टैश्वर्यप्रदायकः ।
नवनागासनाध्यासी नवनिध्यनुशासितः॥ १४३॥

नवद्वारपुरावृत्तो नवद्वारनिकेतनः।
नवनाथमहानाथो नवनागविभूषितः॥ १४४॥

नवनारायणस्तुल्यो नवदुर्गानिषेवितः।
नवरत्नविचित्राङ्गो नवशक्तिशिरोद्धृतः॥ १४५॥

दशात्मको दशभुजो दशदिक्पतिवन्दितः।
दशाध्यायो दशप्राणो दशेन्द्रियनियामकः॥ १४६॥

दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः।
एकादशमहारुद्रैःस्तुतश्चैकादशाक्षरः ॥ १४७॥

द्वादशद्विदशाष्टादिदोर्दण्डास्त्रनिकेतनः।
त्रयोदशभिदाभिन्नो विश्वेदेवाधिदैवतम्॥ १४८॥

चतुर्दशेन्द्रवरदश्चतुर्दशमनुप्रभुः ।
चतुर्दशाद्यविद्याढ्यश्चतुर्दशजगत्पतिः॥ १४९॥

सामपञ्चदशः पञ्चदशीशीतांशुनिर्मलः।
तिथिपञ्चदशाकारस्तिथ्या पञ्चदशार्चितः॥ १५०॥

षोडशाधारनिलयः षोडशस्वरमातृकः।
षोडशान्तपदावासः षोडशेन्दुकलात्मकः॥ १५१॥

कलासप्तदशी सप्तदशसप्तदशाक्षरः।
अष्टादशद्वीपपतिरष्टादशपुराणकृत् ॥ १५२ ॥

अष्टादशौषधीसृष्टिरष्टादशविधिः स्मृतः।
अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ॥ १५३ ॥

अष्टादशान्नसम्पत्तिरष्टादशविजातिकृत्।
एकविंशः पुमानेकविंशत्यङ्गुलिपल्लवः ॥ १५४ ॥

चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः।
सप्तविंशतितारेशः सप्तविंशतियोगकृत् ॥ १५५ ॥

द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ।
षट्त्रिंशत्तत्त्वसम्भूतिरष्टत्रिंशत्कलात्मकः ॥ १५६ ॥

पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः।
द्विपञ्चाशद्वपुःश्रेणी त्रिषष्ट्यक्षरसंश्रयः।
पञ्चाशदक्षरश्रेणीपञ्चाशद्रुद्रविग्रहः ॥ १५७ ॥

चतुःषष्टिमहासिद्धियोगिनीवृन्दवन्दितः।
नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः ॥ १५८ ॥

चतुःषष्ट्यर्थनिर्णेता चतुःषष्टिकलानिधिः।
अष्टषष्टिमहातीर्थक्षेत्रभैरववन्दितः ॥ १५९ ॥

चतुर्नवतिमन्त्रात्मा षण्णवत्यधिकप्रभुः।
शतानन्दः शतधृतिः शतपत्रायतेक्षणः ॥ १६० ॥

शतानीकः शतमखः शतधारावरायुधः।
सहस्रपत्रनिलयः सहस्रफणिभूषणः ॥ १६१ ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
सहस्रनामसंस्तुत्यः सहस्राक्षबलापहः॥ १६२॥

दशसाहस्रफणिभृत्फणिराजकृतासनः ।
अष्टाशीतिसहस्राद्यमहर्षिस्तोत्रपाठितः॥ १६३॥

लक्षाधारः प्रियाधारो लक्षाधारमनोमयः।
चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशकः ॥ १६४॥

चतुरशीतिलक्षाणां जीवानां देहसंस्थितः।
कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः॥ १६५॥

शिवोद्भवाद्यष्टकोटिवैनायकधुरन्धरः ।
सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः॥ १६६॥

त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ।
अनन्तदेवतासेव्यो ह्यनन्तशुभदायकः॥ १६७॥

अनन्तनामानन्तश्रीरनन्तोऽनन्तसौख्यदः।
अनन्तशक्तिसहितो ह्यनन्तमुनिसंस्तुतः॥ १६८॥

## ॥ फलश्रुतिः ॥

इति वैनायकं नाम्नां सहस्रमिदमीरितम्।
इदं ब्राह्मे मुहूर्ते यः पठति प्रत्यहं नरः॥ १६९॥

करस्थं तस्य सकलमैहिकामुष्मिकं सुखम्।
आयुरारोग्यमैश्वर्यं धैर्यं शौर्यं बलं यशः॥ १७०॥

मेधा प्रज्ञा धृतिः कान्तिः सौभाग्यमभिरूपता।
सत्यं दया क्षमा शान्तिर्दाक्षिण्यं धर्मशीलता॥ १७१॥

जगत्संवननं विश्वसंवादो वेदपाटवम्।
सभापाण्डित्यमौदार्यं गाम्भीर्यं ब्रह्मवर्चसम्॥ १७२ ॥

ओजस्तेजः कुलं शीलं प्रतापो वीर्यमार्यता।
ज्ञानं विज्ञानमास्तिक्यं स्थैर्यं विश्वासता तथा॥ १७३ ॥

धनधान्यादिवृद्धिश्च सकृदस्य जपाद्भवेत्।
वश्यं चतुर्विधं विश्वं जपादस्य प्रजायते॥ १७४ ॥

राज्ञो राजकलत्रस्य राजपुत्रस्य मन्त्रिणः।
जप्यते यस्य वश्यार्थे स दासस्तस्य जायते॥ १७५ ॥

धर्मार्थकाममोक्षाणामनायासेन साधनम्।
शाकिनीडाकिनीरक्षोयक्षग्रहभयापहम् ॥ १७६ ॥

साम्राज्यसुखदं सर्वसपत्नमदमर्दनम्।
समस्तकलहध्वंसि दग्धबीजप्ररोहणम्॥ १७७ ॥

दुःस्वप्नशमनं क्रुद्धस्वामिचित्तप्रसादनम्।
षड्वर्गाष्टमहासिद्धित्रिकालज्ञानकारणम् ॥ १७८ ॥

परकृत्यप्रशमनं परचक्रप्रमर्दनम्।
सङ्ग्राममार्गे सर्वेषामिदमेकं जयावहम्॥ १७९ ॥

सर्ववन्ध्यत्वदोषघ्नं गर्भरक्षैककारणम्।
पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदम्॥ १८० ॥

देशे तत्र न दुर्भिक्षमीतयो दुरितानि च।
न तद्गेहं जहाति श्रीर्यत्रायं जप्यते स्तवः॥ १८१ ॥

क्षयकुष्ठप्रमेहार्शभगन्दरविषूचिकाः ।
गुल्मं प्लीहानमाध्मानमतिसारं महोदरम्॥ १८२ ॥

कासं श्वासमुदावर्तं शूलं शोफामयोदरम्।
शिरोरोगं वमिं हिक्कां गण्डमालामरोचकम्॥ १८३॥

वातपित्तकफद्वन्द्वत्रिदोषजनितज्वरम् ।
आगन्तुविषमं शीतमुष्णं चैकाहिकादिकम्॥ १८४॥

इत्याद्युक्तमनुक्तं वा रोगदोषादिसम्भवम्।
सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपः॥ १८५॥

प्राप्यतेऽस्य जपात्सिद्धिः स्त्रीशूद्रैः पतितैरपि।
सहस्रनाममन्त्रोऽयं जपितव्यः शुभाप्तये॥ १८६॥

महागणपतेः स्तोत्रं सकामः प्रजपन्निदम्।
इच्छया सकलान् भोगानुपभुज्येह पार्थिवान्॥ १८७॥

मनोरथफलैर्दिव्यैर्व्योमयानैर्मनोरमैः ।
चन्द्रेन्द्रभास्करोपेन्द्रब्रह्मशर्वादिसद्मसु॥ १८८॥

कामरूपः कामगतिः कामदः कामदेश्वरः।
भुक्त्वा यथेप्सितान्भोगानभीष्टैः सह बन्धुभिः॥ १८९॥

गणेशानुचरो भूत्वा गणो गणपतिप्रियः।
नन्दीश्वरादिसानन्दैर्नन्दितः सकलैर्गणैः॥ १९०॥

शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः।
शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः॥ १९१॥

जातिस्मरो धर्मपरः सार्वभौमोऽभिजायते।
निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशतत्परः॥ १९२॥

योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंयुतः।
निरन्तरे निराबाधे परमानन्दसंज्ञिते॥ १९३॥

विश्वोत्तीर्णे परे पूर्णे पुनरावृत्तिवर्जिते।
लीनो वैनायके धाम्नि रमते नित्यनिर्वृते॥ १९४॥

यो नामभिर्हुतैर्दत्तैः पूजयेदर्चयेन्नरः।
राजानो वश्यतां यान्ति रिपवो यान्ति दासताम्॥ १९५॥

तस्य सिध्यन्ति मन्त्राणां दुर्लभाश्चेष्टसिद्धयः।
मूलमन्त्रादपि स्तोत्रमिदं प्रियतमं मम॥ १९६॥

नभस्ये मासि शुक्लायां चतुर्थ्यां मम जन्मनि।
दूर्वाभिर्नामभिः पूजां तर्पणं विधिवच्चरेत्॥ १९७॥

अष्टद्रव्यैर्विशेषेण कुर्याद्भक्तिसुसंयुतः।
तस्येप्सितं धनं धान्यमैश्वर्यं विजयो यशः॥ १९८॥

भविष्यति न सन्देहः पुत्रपौत्रादिकं सुखम्।
इदं प्रजपितं स्तोत्रं पठितं श्रावितं श्रुतम्॥ १९९॥

व्याकृतं चर्चितं ध्यातं विमृष्टमभिवन्दितम्।
इहामुत्र च विश्वेषां विश्वैश्वर्यप्रदायकम्॥ २००॥

स्वच्छन्दचारिणाप्येष येन सन्धार्यते स्तवः।
स रक्ष्यते शिवोद्भूतैर्गणैरध्यष्टकोटिभिः॥ २०१॥

लिखितं पुस्तकस्तोत्रं मन्त्रभूतं प्रपूजयेत्।
तत्र सर्वोत्तमा लक्ष्मीः सन्निधत्ते निरन्तरम्॥ २०२॥

दानैरशेषैरखिलैर्व्रतैश्च
तीर्थैरशेषैरखिलैर्मखैश्च ।
न तत्फलं विन्दति यद्गणेश-
सहस्रनामस्मरणेन सद्यः॥ २०३॥

एतन्नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं प्रोज्जिहाने
सायं मध्यन्दिने वा त्रिषवणमथवा सन्ततं वा जनो यः।
स स्यादैश्वर्यधुर्यः प्रभवति वचसां कीर्तिमुच्चैस्तनोति
दारिद्र्यं हन्ति विश्वं वशयति सुचिरं वर्धते पुत्रपौत्रैः॥२०४॥

अकिञ्चनोऽप्येकचित्तो नियतो नियतासनः।
प्रजपंश्चतुरो मासान् गणेशार्चनतत्परः॥२०५॥

दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि।
लभते महतीं लक्ष्मीमित्याज्ञा पारमेश्वरी॥२०६॥

आयुष्यं वीतरोगं कुलमतिविमलं सम्पदश्चार्तिनाशः
कीर्तिर्नित्यावदाता भवति खलु नवा कान्तिरव्याजभव्या।
पुत्राः सन्तः कलत्रं गुणवदभिमतं यद्यदन्यच्च तत् तत्
नित्यं यः स्तोत्रमेतत् पठति गणपतेस्तस्य हस्ते समस्तम्॥२०७॥

गणञ्जयो गणपतिर्हेरम्बो धरणीधरः।
महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः॥२०८॥

अमोघसिद्धिरमृतमन्त्रश्चिन्तामणिर्निधिः।
सुमङ्गलो बीजमाशापूरको वरदः कलः॥२०९॥

काश्यपो नन्दनो वाचासिद्धो ढुण्ढिर्विनायकः।
मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान्॥२१०॥

उपायनं ददेद् भक्त्या मत्प्रसादं चिकीर्षति।
वत्सरं विघ्नराजोऽस्य तथ्यमिष्टार्थसिद्धये॥२११॥

यः स्तौति मद्गतमना ममाराधनतत्परः।
स्तुतो नाम्ना सहस्रेण तेनाहं नात्र संशयः॥२१२॥

नमो नमः सुरवरपूजिताङ्घ्रये
नमो नमो निरुपममङ्गलात्मने।
नमो नमो विपुलदयैकसिद्धये
नमो नमः करिकलभाननाय ते॥ २१३॥

किङ्किणीगणरचितचरणः
प्रकटितगुरुमितचारुकरणः ।
मदजललहरीकलितकपोलः
शमयतु दुरितं गणपतिनाम्ना॥ २१४॥

॥ इति श्रीगणेशपुराणे उपासनाखण्डे ईश्वरगणेशसंवादे
गणेशसहस्रनामस्तोत्रं नाम षट्चत्वारिंशोऽध्यायः॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Vakratunda_Mahaganapati_Sahasranama_Stotram.
generated on **May 9, 2026**
Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits